28

① लेखक - हरदास
वादिभूषणं
पेज = 1
= 24 x 9.5 x 0.1 c.m.

तिश्चाश्रिं च निवृत्तेरेव मिथ्यात्वकल्पनोपपत्तौ
... ...
विरचितं वादिभूषणं समाप्तं लिखितं मनोहरदासेन
स्वपठनार्थं

---

② पेज = 4
विषय = दर्शन
= 21 x 16.5 x 0.1 c.m.

भावांतराविरोधोयथान्यस्तुल्यपर्यताद्भयासि
... ...
स्वीयैक्रियतेपद् येनैवतुनास्तिशब्दरूप

---

① कुडमारीचिमाला
पेज = 2

= 25 x 17 x 0.1 c.m.
लेखक - विवकु

तिष्ठा॥किंचनिरस्तैरेवमिथ्यात्वकल्पनोपपन्नौवंधस्यतुकल्पनानुपपन्निष्ठा॥प्रत्यक्षसिद्धहेतुभावादपिकार्यानुत्प
त्तौसहकार्यंतरकल्पनादेववेदप्रमाणत्वात्तस्मान्निरस्तासास्त्रेवमिथ्यात्वमानं॥किंचब्रह्मवद्वंधस्यापिवेदवोध्यस्यापि
वेदवोध्यत्वेननमिथ्यात्वं॥नचवंधस्यतथात्वेपितज्ज्ञानस्यावाधकत्वेनरजतवन्मिथ्यात्वमितिवाच्यं॥तथासति
ब्रह्मणोपिमिथ्यात्वापत्तिः॥तथाहि॥ब्रह्मस्वरूपयथार्थमिथ्याभूतज्ञानविषयत्वात्तद्रूप्यवदितियद्वाब्रह्मज्ञानं
स्वयथार्थविषयांशावाधकत्वात्तद्रूप्यज्ञानवदिति॥नचविनाशित्वंविनाशविषयकज्ञानविषयत्वंचोपाधिर्दु
ष्करसजन्यज्ञानविषयत्वेनतादृशज्ञानत्वेनवाऽप्याधोरपिपक्षेसाधनात्॥नचकार्याद्रूपभावादेत्वासिद्धिरि
तिवाच्यं॥तथासतिवैदिकवंधेपितद्भावेनमिथ्यात्वानुपपत्तिः॥नचोभयोरावाधकवेदवेद्यत्वेपिवंधस्यावा
धकत्वान्मिथ्यात्वंनब्रह्मणइतिवाच्यं॥वेदाप्रामाण्यापत्तेरातस्माद्वंधमिथ्यात्वखंडनंवेदप्रामाण्या
नुकूलमितिसिद्धं॥॥इतिश्रीमत्पुरुषोत्तमाचार्यविरचितंवादिभूषणंसमाप्तं॥लिखितंमनोहरदासे
नस्वपठनार्थं॥८॥

माणांतराविरोधो यथा च स्तुत्यर्थेनात दुभयस्मि ।
न्नर्थे गुणवादस्त्विति तस्मिन्निरिति चा सूत्रयुजे
मिति: तस्माद्यत्र सोर्थोर्थवादानां प्रमाणांतरवि
रुद्धः तत्र गुणवादेन प्राशस्त्यलक्षणेति लक्षित ।
लक्षणा यत्र तु प्रमाणांतरसंवादः तत्र प्रमाणांत
रादिवार्थवादादपि सोर्थः प्रसिध्यति द्वयोः पर
स्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृ
त्तेः प्रमात्रपेक्षया त्वनुवादत्वं प्रमाता ह्यव्युत्पन्नः
प्रथमं यथा प्रत्यक्षादिभ्योर्थमवगच्छति न तथा ।
म्नायतस्तत्र व्युत्पत्त्याद्यपेक्षत्वात् न तु प्रमाणापेक्ष
याऽनुवादत्वं द्वयोः स्वार्थेनपेक्षत्वादित्युक्तं न
न्वेवं मानांतरविरोधेपि कस्मात् गुणवादो भवति
यावता शब्दविरोधे मानांतरमेव कस्मात् न बाध्य
ते वेदांतैरिवाद्वैतविषयैः प्रत्यक्षादयः प्रपंच ।
गोचराः कस्माद्वार्थवादवद्वेदांता अपि गुणवादे
न नीयंते अत्रोच्यते लोकानुसारतो द्विविधो
हि विषयः शब्दानां द्वारतश्च तात्पर्यतश्च य
थैकस्मिन्वाक्ये पदानां पदार्थाः द्वारतो वा ।

२

क्यार्थश्च तात्पर्यतो विषयः एवं वाक्यद्वयैक

वाक्यतायामपि यथेयं देवदत्तीयागौः क्रेतव्ये

त्येकं वाक्यं एषा बहुक्षीरेत्यपरं तदस्य बहु

क्षीरत्वप्रतिपादनद्वारं तात्पर्यंतु क्रेतव्येति वाक्यांत

रार्थे तत्र यद्द्वारतः तत्प्रमाणांतरविरोधे

ऽन्यथानीयते यथाविषंभक्षयेतिवाक्यं मास्य

गृहे भुंक्ष्वेतिवाक्यांतरार्थपरं सत् यत्र तु तात्प

र्यं तत्र मानांतरविरोधेपौरुषेयमप्रमाणमेव

भवति वेदांतास्तु पौर्वापर्यालोचनया निरस्त

समस्तभेदप्रपंचब्रह्मप्रतिपादनपरा अपौरु

षेयाः स्वतःसिद्धतात्त्विकप्रमाणभावाः संतः

तात्त्विकप्रमाणभावात्प्रत्यक्षादीनि प्राच्याव्य

सांव्यवहारिके तस्मिन्व्यवस्थापयंति न चादि

त्यो वै यूप इति वाक्यं आदित्यस्य यूपत्वप्रतिपा

दनपरं अपितु यूपस्तुतिपरं तस्मात्प्रमाणांत

रविरोधे द्वारीभूतो विषयो गुणवादेन नीयते

यत्र तु प्रमाणांतरविरोधकं नास्ति यथा देव

ताविग्रहादौ तत्र द्वारतोपि विषयः प्रतीय

मानेन शक्यस्त्यक्तुं नच गुणवादेननेतुं को हि मु
ख्ये संभवति गौणमाश्रयेदिति प्रसंगात् तथास
त्यनधिगतविग्रहादिप्रतिपादयद्वाक्यं भिद्येतेति चे
त् अश्रद्धाभिन्नमेवैतद्वाक्यं तथासति तात्पर्यभेदो
पीति चेत् नद्वारतोपि तदवगतौ तात्पर्यान्तरकल्पना
याः प्रयोगात् नच यस्य यत्र तात्पर्यं तस्य तत्र प्रामा
ण्यं तथासति विशिष्टपरं वाक्यं विशेषणे ष्वप्रमाण
मिति विशिष्टपरमपि न स्यात् विशेषणविषयता
त् विशिष्टविषयत्वेन तु तदाक्षेपे परस्पराश्रय
त्वमाक्षेपात् विशेषणप्रतिपत्तौ सत्यां विशिष्टवि
षयत्वं विशिष्टविषयत्वाच्च तदाक्षेपः तस्माद्वि
शिष्टप्रत्ययपरेभ्योपि ~~पदेभ्यो~~पि यदेभ्यो विशे
षणानि प्रतीयमानानि तस्यैव वाक्यविषयत्वं
नानिष्टतापत्युपेयानि यथा तथान्यपरेभ्यो
प्यर्थवादवाक्येभ्यो देवताविग्रहादयः प्रतीय
मानाः प्रसति प्रमाणान्तरविरोधे न युक्तास्त्य
क्तुं नहि मुख्यार्थसंभवे गुणवादो युज्यते न

२

चभूतार्थमप्यपौरुषेयं वचो मानांतरापेक्षं स्वार्थे
येन मानांतरासंभवे भवेद्प्रमाणमित्युक्तं स्यादेता
नात्पर्यैक्येपि यदि वाक्यभेदः कथंतर्हि यैकता
देकवाक्यं न तत्र नत्र यथास्वं तत्तत्पदार्थविशि
ष्टैकपदार्थप्रतीतिपर्यवसानसंभवात् सत्तुप
दार्थांतरविशिष्टः पदार्थएकः क्वचिद्द्वारभूतः
क्वचिद्द्वारीत्येतावान्विशेषः नन्वेवं सत्योदनंभु
क्त्वाग्रामंगच्छतीत्यत्रापि वाक्यभेदप्रसंगः अन्योहि
संसर्गओदनंभुक्त्वेति अन्यस्तुग्रामंगच्छतीति नएक
त्रप्रतीतेरपर्यवसानात् भुक्त्वेतिहिसमानकर्तृक
ता नापूर्वकालत्वंचप्रतीयते नचेयंप्रतीतिरपरका
लक्रियांतरप्रत्ययमंतरेण पर्यवस्यति तस्माद्याव
तिपदसमूहे पदांतरानपेक्षिताः पदार्थाः स्मृतयः पर्यवस्यं
तितावदेकंवाक्यं अर्थवादवाक्येचैताः पर्यव
स्यंतिविनैवविधिवाक्यं विशिष्टार्थप्रतीतेः न
चद्वाभ्यां द्वाभ्यां पदाभ्यां विशिष्टार्थप्रत्ययपर्य
वसानात् पंचषट्पदवति वाक्ये एकस्मिन्ना

३

मा व ४२ 7

प्रसंगः नानात्वेपि विशेषणानां विशेष्यस्यैकता ।
त्तस्य च सकृच्छ्रुतस्य प्रधानभूतस्य गुणभूतविशे
षणानुरोधेनावर्तनायोगात् प्रधानभेदेनुवा
क्यभेद एव तस्माद्विधिवाक्यार्थवादवाक्यमन्य
दिति वाक्ययोरेव स्वस्ववाक्यार्थप्रत्यायावसित ।
व्यापारयोः पश्चात्कृतश्चिदयेहायां परस्प
रान्वय इति सिद्धं अपि चेन्द्रादिदेवतानीति देव
तामुद्दिश्य हविरवमर्षश्च तद्विषयस्त्वत्याग
इति हि यागशरीरं न च चेतस्यनालिखिता देव
तोद्देष्टुं शक्या न च स्वरूपरहिता चेतसि शक्यत
आलेखितुमिति यागविधिनैव तद्रूपापेक्षिणा या
दृशं मन्त्रपरेभ्योपि मन्त्रार्थवादेभ्यस्तद्रूपमव ।
गतं तदभ्युपेयते रूपान्तरं [struck: ...]
[struck: श्रुभिन्नार्थयतीति च धर्मशास्त्रकाराः प्रपञ्चाहुः]
[struck: तेन मन्त्रार्थप्रसेतं सर्वकामफलेः श्रुनेरिति]
[struck: पुराणेव चासिन्धांसि च देवताविग्रहादिपं ।]

कप्रपंचमाचक्षते लौकिकाऽप्यविद्वांसो विग्रहा
दिपंचकं स्मरंति चोपचरंति च तथाहि यमं दंड
हस्तमालिखंति वरुणं पाशहस्तमिंद्रं वज्र
हस्तं कथयंति च देवता भुंक्त इति तथेशा
नामिमामाहुः देवग्रामो देवक्षेत्रमिति तथा
स्याः प्रसादं च प्रसन्नायाश्च फलदानमाहुः
प्रसन्नोस्य पशुपतिः पुत्रोस्य जातः प्रसन्नो
स्य धनदो धनमनेन लब्धमिति तदेतत्सर्वे
पद्धीदूषयति नेत्युच्यते नहि लोको नामेति
न खलु प्रत्यक्षादिव्यतिरिक्तो लोको नाम प्रमा
णंतरमास्ति किंतु प्रत्यक्षादिमूला लोकप्रसिद्धिः
सत्यतामश्नुते तदभावे त्वंधपरंपरावत्मूला
भावात् विप्लवते न च [illegible] विग्रहादौ प्रत्यक्षादी
नामन्यतमदस्ति प्रमाणं न चेतिहासादिमूल
मनिनुमर्हति तस्यापि पौरुषेयत्वेन प्रत्यक्षा
द्यपेक्षणीयात् प्रत्यक्षादीनां चात्राभावादिसा

कल्पनायां प्रमाणाभावात् मंत्रार्थवादयोरत्यंतपरो
क्षवृत्तिप्रसंगाच्च यथाहि व्रात्यो व्रात्यस्तोमेन यजेते
ति व्रात्यस्वरूपापेक्षायां यस्य पितापितामहो वा सोमं
न पिबेत् स व्रात्य इति सिद्धवत् व्रात्यस्वरूपमवगतं व्रा
त्यस्तोमविध्यपेक्षितं सद्विधिप्रमाणकं भवति तथा
च स्वर्गस्वरूपमलौकिकं स्वर्गकामो यजेतेति विधि
नापेक्षितं सदर्थवादतोवगम्यमानं विधिप्रमाणकं
न: तथा देवतारूपमपि मंत्रोद्देशो रूपज्ञानमपेक्षते ननु
नारूपस्य ज्ञानमपि देवतायाः समारोपेणापि च रूप
ज्ञानमुपपद्यते इति समारोपि तमेव रूपं देवतायां म
त्रार्थवादैरुच्यते सत्यं रूपज्ञानमपेक्षते तच्चान्यतो
संभवात् मंत्रार्थवादेभ्य एव तस्य तु रूपस्यासति
बाधकेनुभवारूढं तथाभावं परित्यज्यान्यथात्व
मननुभूयमानमसांप्रतं कल्पयितुं तस्माद्विध्य
पेक्षितं मंत्रार्थवादैरन्यपरैरपि देवतारूपं बुद्धा
वुपनिधीयमानं विधिप्रमाणमेवेति युक्तं स्या
देतत् विध्यपेक्षायामन्यपरादपि वाक्यादवग
तोर्थः स्वीक्रियते तदपेक्षैव तु नास्ति शब्दरूप

विश्वा १२ गुलानि अंबुच्चत्वारोयवाः नेत्रयूके तुंगतायांरूप १ अंगुलंषट्यवाः ६ शून्ययूका
थचतुर्हस्ते दैर्घ्ये जिनांगुलानिखरवयुगमितिशून्ययवाः शून्ययूकेतिविस्तृतो भूपांगुलानियवयूके
न्ये तुंगतायामंगुलद्वयंयवयुकेतिशून्ये अथपंचहस्ते कुंडेदैर्घ्ये अंगपक्षाः षड्विंशांगुलानिनगय
वाः ७ शून्ययूकाविस्तृतो अष्टत्ययसप्तदशांगुलानि १७ सप्तयवाः रामेतियूकान्वयं तुंगतायांहिवि
शत्यंगुलद्वयंयमौ इतियवौद्वौव्योमयूकाशून्यं अथषडस्तेदैर्घ्ये खेचराशिणी एकोनत्रिंशदंगुलानिस
ममितियवाः २ पयोदाश्वतस्रोयूकाः विस्तृतो नंदरूपाएकोनविंशत्यंगुलानिशरयवाः ५ शून्ययू
का तुंगतायांद्वाविंशत्यंगुलद्वयंगुणयवाः ३ पंचयूका अथसप्तहस्ते दैर्घ्येमहीहुतभुजः एकत्रिं
शदंगुलानिअंगयवाः ६ शून्ययूका विस्तृतोमूर्छनांगुलानिरूपंयवः द्वेयूके तुंगतायांनयनांगुलानि
नयनत्रिंशदंगुलानि ३२ सप्तयवाः ७ युगयूका ४ विस्तृतोआहृतिद्वाविंशति अंगुलानिपंचयवाः ५
शून्ययूका तुंगतायांनयनांगुलानिअंगयवाः ६ अंबुदजलदाः ४ अथनवहस्ते दैर्घ्येषट्त्रिंश
दंगुलानि २६ यवयूकाशून्यं विस्तृतो जिनांगुलानि २४ यवयूकाशून्यं तुंगतायांगुणांगुलानि ३ यव
यूकाशून्यं अथदिकरे कुंडेदैर्घ्येनवगुणांगुलानि ३९ गिरयोयवाः ७ वनस्तोलीसाः ४ विस्तृतोत
त्वांगुलानि २५ नेत्रयवौ २ यूके २ तुंगतायांगुणांगुलानि ३ रूपमेकंयवः १ यूकाशून्य ३० अथकं
ठः खाताद्बहिः सेवाजिनांशकेनकंठसमंतात्परेकभागैः एकांगुलस्यात्करमात्रकुंडेधुनाब्जके-
खातविधानमानं ३१ अस्यार्थः खाताद्बहिः सेवचतुर्विंशांशेन समंततः कंठः स्यात् तेन हस्ते
न एकांगुलं द्विहस्ते पंचयूकोनसार्धांगुलं त्रिकरे मुलमेकं पंचयवाः यूकापंच [illegible] लीसा चतुःकरे

गुलद्वयंपंचालिक्षा षंचकरे गुलद्वयंयथेकोयवः सप्तयूकाः षष्टकरेगुलद्वयंत्रयोयवाश्चनवयोयूकाः पंचालिक्षाः सप्तहस्तेगुलद्वयंपंचयवाः यूकैकालिक्षातिस्रः अष्टहस्तेगुलद्वयंषट्यवाः यूकाशून्यपंचलीक्षा नवकरे त्रिण्यंगुलानियवयूकाशून्यं दशकरे त्रिण्यंगुलानि एकोयवाः विस्तारतुल्यमित्यादि ३२ आदौकुंडस्यसम इतिहि मेखलमानमग्रणीः मेखलोनभवेतुवातंकुंडस्यान्मेखलायुनं यावान्विस्तार तुल्यं आद्यमेखलोन्नत्याप्रथममेखलोच्चतासमप्रमारिभिराचार्यैः खातमवादिसमेखल सर्वखातमित्यर्थः ननुयोन्यादिषुविस्तारायामभावात् चतुरस्त्रविस्तृतमिति प्रथमयोन्यादिकुंडेषु प्रकृतिभूतस्यमूल भूतस्य चतुरस्त्रस्यविस्तारः समइत्यर्थः कचिदिति मेखलांत्यक्त्वाप्रथममेखलोन्नत्यंत्यक्त्वाशेषंखातमित्याचार्यः अथतन्नतावत्कुंडमंडपादिसाधनार्थं भूमिसंशोधनं बोधायनः प्राह प्रारंभात्पूर्वतः कुर्यात्खननंकर्मसिद्धये जलांतंप्रस्तरांतं वापुरुषांतमथापि वा पुनः संपूरयेत्खातंतत्र कर्मसमारभेत् व्याख्या तत्रकुंडमंडपादिसिद्धौवास्तुकर्मणि भूमिशोधनप्रारंभात्पूर्वतः कुर्यातइतिप्रारंभादिविजपप्रारंभात् केचित्तुमनसंकल्पमेवप्रारंभस्तेषांमतेषण्मासात्पूर्वं खननंयुक्तं सवर्षेस्मिन्यज्ञकर्मकरिष्यामित्युक्ते तदेवखननंप्रारंभो यमर्थः सकामयाजीषण्मासात्पूर्वं खातंशोधयेवमृत्पूर्वादधिकाचेच्छुभं समाचेत्तदामध्यम न्यूनाचेत्तदाकर्महानिः उक्तंचवास्तुकर्मणी गृहेकुंडेहस्तमितंखात्वाप्यांप्रपूरितं यन्न्यूनपरिशिष्टंतत्समेसमंधन्यमधिकंतत्सदामिति अवटमथांबुपूर्णंपदशामित्यागतस्ययदिनोनं तद्धन्यंयत्रभूलास्तातासतासंख्याचतुःषष्टिः यत्रतुषष्टिपलानिजलंतिष्ठतिनिशेषगतेत्यर्थः साभूमिर्धन्याइति

मतेषण्मासात्पूर्वतःखातमित्यादि अथवामहत्य ज्ञेषहुदिनसाध्येसमग्रकुंडमंडपभूमिखननेअ-
यास्मिनयागेचतुर्दिक्षुमंडपस्तावन्मितभूखननेषण्मासात्पूर्वंकुर्यादिति एकमंडपेपिनचकुंडविधानभू-
भादर्वाक्समग्रमंडपायामदैर्घ्यशोधंकर्त्तुअशक्यत्वात्षण्मासादिपूर्वंस्यात् अमुमेवार्थंगृहीत्वात्रादिति
पूर्वंसूत्रत्रयपात्यपश्चाद्यथावीसमारभेत् तत्रवर्णवशाच्छुद्रादीनांस्वस्वकर्मणि श्वेताशरक्ताद्विजंद्राणांस्क्रा
भूमिमंत्रीभूजा विशापीतान्चशूद्राणांकृष्णान्येनचमिश्रिता यत्रयत्रसदृशीभूस्तत्रतत्रकुंडवास्त्रकर्म-
णिचेति एवंगंधासदेवतानतृणरसादिभिःस्वस्ववर्णभूमिंज्ञात्वा भूम्यानिश्चयेतत्पुरुषाघोरवामदेवस-
द्योजातमितिचतुर्भिर्मंत्रैराज्यहुत्वास्वस्ववर्णतांसंपाद्यप्रकटीकृत्वावाखनित्वाशुद्धमृदापूरयित्वाकुट्टनादिना
दृढांकृत्वासमाकारयेत् अथातःसिकताकल्पंव्याख्यास्यामः केशतुषखर्परशर्करास्थिपिप्पलिकासिकता
भस्मानिवर्जयेत् भस्मनायजमानक्षयस्याग्रामविनाशनंपिप्पलीकानाराष्ट्रभंगः आर्द्रसिकताभिर्विद्याभयं
केशैस्त्रीमरणंतुषेणपुत्रमरणंकपालेकृतिग्भयंशर्करयाबंधुवियोगस्तृणेनकर्मक्षयोभवतीत्याहभगवान्बौ-
ध्यायनः आर्द्रानिषिद्धासिकताकृष्णासंयुक्ताभवेदिति अथभूमिप्रार्थना तुषकेशेश्वपाषाणेवल्मिकांगारव-
र्जितेः विष्णुशक्तिसमुद्भूते शंखवर्णेवसुंधरे अनेकरत्नसंपन्ने भूमिदेविनमोस्तुते अथभूमिपरत्वयाभूमिः श्वे-
तास्याद्ब्राह्मणीपृथ्वीरक्तास्यात्क्षत्रिणीतथा वैशावैपीतकाज्ञेयाशूद्राकृष्णाप्रकीर्त्तिता ब्राह्मणीभूमिवर्णघृतस्रग-
थासमित्प्रवराविराड्वापिहृदयेष्टाश्शूद्रेचैकामकीर्त्तिताब्रह्मगंधासितादिमाब्राह्मणीमधुराधुराकुंकुमाभातिती
स्यान्क्षतीस्यारक्तगंधका वैश्यापिताकषायान्वधान्यगंधाप्रशस्यते कुंकुमामध्यगंधान्चकृष्णाशूद्रावसंधरा-
अथभूमिसमीकरणसूत्रं मूलैक्यांकिलदंडयोःसरलयोःरज्जुद्वयंन्यंतयात्रीर्यक्दंडमयोस्यमध्यमतवेमूला-

त्यजेल्लंबकं निम्नायत्रभवेद्दूरात दधिकावापूरयेद्वारस्तनेदेवं कूर्मनिभाद्यरामुनिवरैः कुंडादिनस्यांस्मृतं
४२ अथप्राचीसाधनं वार्केक्रांतिलवास्तकर्णनिहतनिभोंकर्णनिघ्निनमोत्सामासारविदिक्भुजोयमदिशि
द्विघ्नासमासस्त्रतः केंद्रेभ्योत्थहतोसपूर्णगुणवद्धा यात्मदेयोभवेद्याम्योदक्सभुजाद्वकेंद्रमुदितारज्जु
श्चपूर्वापरा समतलमस्तकपरिधिधमोसिद्धोदंतीदंतजशंकुः ४४ अथवासूच्यग्रः सरलः शंकुःपृथुमूलोप-
रवादिरः मूलमध्येतुसूक्ष्माग्रंस्थिरीकर्तुंमकल्पयेत् ४५ शंकोःऋजुकरणं सपादशंकुतुंगत्वमानेनकोण-
तायकैः चतुःकीलैः स्पष्टकीलाएवंशंकुऋजुर्भवेत् ४६ अथमंडपसाधनं गृहादीशानभागेग्रामादेवपुण्यती
र्थेपर्वतेवाषोडषहस्तंषोडषस्तंभसममंडपं कुंडमंडपंवासमचतुरस्रंकुर्यात् मंडपलक्षणंत्वाथर्वणसूत्रा-
दिभिरवगंतव्यं विस्तरभयान्नेहलिख्यंते तत्रसमचतुरस्रसाधनमाह सूत्रेप्राचीविलंघ्यमित्यादि ४७ प्र
कारांतरेणचतुरस्रमाह व्याख्या द्विगुणेत्यादि ४८ प्राच्यंतःशंकोरित्यादि ४९ अथसमकुंडमंडपयोःकुं-
डवेद्योर्निर्णयोलिख्यते वेदेपूर्वेस्वाग्निसंख्यैर्गुलैस्तत्कार्यंकुंडंभवेदच्चतुरस्रं श्लक्ष्णरामः परंतुमंडपवे
ध्रातेसाम्यंकुंडमाद्यात्किलाथा ५१ वेदेप्रत्यग्वर्तुलंचतुरस्रकुंडमध्येमंडपेमालवीयः पद्येभागेवारुण्ये
दीक्षितोवैरामः कुंडंप्रावदत्सर्वसिध्यै ५२ महार्णवमतेवेद्याईशान्यांचतुरस्रकं अष्टास्रंवायत्यांकसर्वका
मार्थयोःकिल ५३ बौधायनाःशौनकवर्यलयोःमध्येचतुःस्तंभवेदिभागेकुंडानिचेत्स्यात्सममंडपःस्याद्वेदीत्वदै
शान्येयदिमध्यवेदीः ५४ ऐशानकेकुंडविनिश्चयश्चेच्चित्यंतदानिफलामिष्टमेभिः मध्योन्नतःस्तंभचतुष्टयेनकुंडेभवे
द्यदिहितकार्यकारः ५५ कुंडमंडपवेदीनां विशिष्टोऽववविष्णुना निर्णयोविहितोग्रंथःसंक्षिप्तःसुखबोधये ५६ इति
विष्णुविरचिताकुंडमरीचिमालासमाप्ता: श्रीगायत्र्यार्पणमस्तु श्रीदत्तात्रयार्पणमस्तु

॥ इति [illegible] नां विंशतिग्रंथाः समाप्ताः ॥

नङ्. यजः याच्ञा यत्नः विश्नः प्रश्नः रक्ष्णः उपसर्गे घोः किः प्रधिः उपाधिः स्त्रियां क्तिन् स्त्री
लिङ्गे भावादौ क्तिन् कीर्तिः स्तुतिः स्तुतिः घञोऽपवादः कृतिः ऋतिः ऋल्वादिभ्यः क्तिन् निष्ठावद्वक्तव्यः
तेन नत्वम् कीर्णिः लूनिः धूनिः पूनिः सम्पदादिभ्यः क्विप् सम्पत् आपत् क्तिन्नपीष्यते सम्पत्तिः विप
त्तिः आपत्तिः ऊतियूतिजूतिसातिहेतिकीर्तयश्च इति निपात्याः कृञः श च कृत्या क्यप् च कृञः ॥
क्यप् चात् क्तिन् प्रकरणं प्रक्रिया प्रकृतिः इच्छा इच्छेति निपात्यते यक् च । अ प्रत्ययात् प्रत्ययान्तेभ्यः स्त्रि
यामकारः प्रत्ययः स्यात् चिकीर्षा पुत्रकाम्या गुरोश्च हलः गुरुमतो हलन्तात् स्त्रियाम् अकारप्रत्ययः ईहा
ऊहा षिद्भिदादिभ्योऽङ्. जृष् अङ् ह लोङ्. जरणाः जरा त्रपूष त्रपा भिदा विदारणे इत्याद्यर्थ भित्तिरन्या
छिदा मन्त्रा कृपेः सम्प्रसारणञ्च कृपा आतश्चोपसर्गे अङ्. क्तिनोऽपवादः उपसीयते उपदा प्र
प्रदा उपधा श्रद्धा एषा सम्प्रसारणे च अश्रपदाः कारणा आसना श्रन्थना रोगाख्यायां ण्वुल्
बहुलम् ॥ प्रच्छर्दिका प्रवाहिका विचर्चिका क्वचिन्न शिरोर्तिः धात्वर्थनिर्देशे ण्वुल् वक्तव्यः आसिका
इक्श्तिपौ धातुनिर्देशे पचिः पचतिः वर्णात्कारः निर्देशादिष्वेव अकारः अकारः रादिफः नपुंसके
भावे क्तः ल्युट् च हसितम् हसनम् करणाधिकरणयोश्च ल्युट् अनुमानम् अनुमानी गोदोहिनी स्था
ली पुंसि संज्ञायां घः प्रायेण ॥ दान्तः दीर्घ उपसर्गस्य । घि अन्तः उपसर्गस्य इति नस्य दान्तः ह्रस्वः । दन्त
च्छदः आकुर्वन्त्यस्मिन्निति आकरः । अवे तॄस्त्रोर्घञ् अवतारः अवस्तारो जवनिका हलश्च

तामन्ता समासेऽनञ्पूर्वे क्त्वो ल्यप् अव्ययपूर्वपदे सतिऽनञ्समासे क्त्वो ल्यबादेशः तुक् । प्र
त्य अनञः किं अकृत्वा अव्ययपूर्वपदात् किं परमकृत्वा अदो जग्धि ल्यप्ति किति प्रजग्ध्य
ल्यपि लघुपूर्वात् परस्य णेरय् विगणय्य वा ल्यपि अनुदात्तोपदेशवनतितनोत्यादीनामनु
नासिकलोपः स च व्यवस्थितः मान्तानां वा नान्तानां नित्यं आगम्य आगत्य मत्वा नत्वा
पि ल्यपि परेषु मास्यादि तिन ततन प्रदाय प्रपाय इत्यादि आभीक्ष्ण्ये णमुल् च । चावीनः
पुन्ये चोत्ये क्त्वा विधये णमुल् क्त्वा च नित्यं वीप्सयोः आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य
द्वित्वं स्यात् आभीक्ष्ण्ये तिङव्ययसंज्ञक कृदन्ते च पचति पचति स्मारं स्मारं नमति ग
स्मृत्वा स्मृत्वा पायं पायं भोजं भोजं श्रावं श्रावं अन्यथैवं कथमित्थं सु सिद्धाप्रयोग
श्चेत् तत्र कृञो णमुल् स्यात् सिद्धाप्रयोगस्य एवं कृतस्यैव कः अनर्थकत्वात् प्रयोगानर्ह इत्यर्थः अ
न्यथाकारं एवंकारं इत्थंकारं भुंक्ते इत्थं भुंक्ते इत्यर्थः सिद्धेति किं शिरोऽन्यथा कृत्वा भुंक्ते
यावति विन्दजीवोः यावद्वेदं भुंक्ते यावल्लभते तावदित्यर्थः यावज्जीवमधीते निमूलसमूल
योः कषः कर्मण्युपपदे कषादिषु यथाविध्यनुप्रयोगः यस्मात् णमुलन्तः सशब्दानुप्रयो
क्तव्यः निमूलकाषं कषति समूलकाषं कषति निमूलसमूलं कषतीत्यर्थः [illegible] कृतो दे

ह्रे तौस्वार्थे णिचि चित्तपादिभ्यो ऽन्येभितो नम्पुः उपधायाश्च धातोरुपधाभूतस्य ऋ तद्दल्स्या ल
की र्तयति आकुसीयमात्मनेपदम्. णि सन्नियोगेनैवेति कुस्मनाम्नो वा. कामपादीनाम्वेति
लो चङ्यु वा व्यम अचीकरणत् अचकारणत् नामलोपि शास्त्वदितात् णि चाग्लोपिनः शास्तेऋदिता च
पधाया उपधाया ह्रस्वोनस्या ञ्च इः परेलो अन्त्तनो कत घनश्री ओने कूच तकारः घनयति धवति प्रा
ह्रस्वः २ तिपदिकाद्धात्वर्थे चङ्लमिष्टवच्च प्रातिपदिकाद्धात्वर्थे णि चस्यादिष्टे यथाप्रातिपदिकस्य
पन्वद्भाव स्माव टिलोपविमतु वलोप यणादिलोप प्रस्थस्फायादेश भस्थ सात्तदृणावपि स्नुः प
टुमाचष्टे पटयति ... तत्करोति तदाचष्टे णि च तेनातिक्रामति अस्यपति धातुरूपं च णि
चः प्रकृतिर्धातु रूपं प्रलिप धत्ते चकारेन्ते सम्प्रयार्थः तथा च वार्तिकम् आख्यानात्
तत्सदाचष्टे णि च कृल्लुक् प्रकृति प्रत्यापत्तिः प्रकृतिवच्च कारकमिति कंसं घातयति हनुस्तोर्वा
सात्नोः हनोस्तकारो तादेशः स्यात् ञिणित्सु च जौ णिति कंसमनीयत कर्तृकरणाद्धात्वर्थे
अस्यपति श्वेतास्व तद्गालोडिताक्षरकारणाम अश्वतरेन कलोपश्च श्वेतयते ॥ इति कुराद
पः ॥ छ ॥ साम्बशिवाय नमः ॥ वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वन्दे
पार्वतीपरमेश्वरौ ॥ दुर्गायै नमः ॥ शुभमस्तु
॥ सर्वत्र जगति ॥ श्यामानन्दस्येदं पुस्तकम् ॥

दुर्गा २